योगशान्तिप्रदं गणाधीशस्तोत्रम्

{॥ योगशान्तिप्रदं गणाधीशस्तोत्रम् ॥}

श्रीगणेशाय नमः ।

कर्दम उवाच ।

केनोपायेन भो वत्स योगशान्तिः प्रलभ्यते ।

तदर्थं पूजनीयं किं तद्वदस्व जनार्दन ॥ १॥

कपिल उवाच ।

गणेशभजनं मुख्यं शान्तियोगप्रदं मतम् ।

योगाकारस्वरूपं तं ब्रह्मेशं भज मानद ॥ २॥

सर्वादिः सर्वपूज्योऽयं सर्वाधारो महामुने ।

य आदिः प्रलयान्ते स तिष्ठति शास्त्रसंमतम् ॥ ३॥

ज्येष्ठराजं गणेशानं वेदेषु प्रवदन्ति तम् ।

गणाः समूहरूपाश्च तेषां स्वामी प्रकथ्यते ॥ ४॥

नानाजगत्स्वरूपं वैदेहरूपं कृतं मुने ।

नानाब्रह्ममयं तेन शिरः कृतं महात्मना ॥ ५॥

यस्माज्जातमिदं यत्र ह्यन्ते गच्छति महामते ।

तद्वेदे गजशब्दाख्यं शिरस्तेन गजाननः ॥ ६॥

त्रिविधं भेदयुक्तं यदखण्डं वै तुरीयकम् ।

तयोर्योगे गणेशोऽयं देहमस्तकयोर्गतः ॥ ७॥

चित्तं पञ्चविधं प्रोक्तं तत्र मोहश्च पञ्चधा ।

मोहरूपा महासिद्धिर्बुद्धिश्च मोहधारका ॥ ८॥

तयोः स्वामी गणाधीशश्चित्ते नित्यं प्रतिष्ठितः ।

चिन्तामणिर्महाभागो लभ्यते योगसेवया ॥ ९॥

पञ्चधा चित्तमुत्सृज्य तदैश्चर्यं तथैव च ।

योगः शान्तिमयः सद्यः प्राप्यते ब्रह्मणस्पतिः ॥ १०॥

तस्मात्तं भज मन्त्रेणैकाक्षरेण महामुने ।

तेन तुष्टो गणेशानो योगं दास्यति शान्तिदम् ॥ ११॥

इति मुद्गलपुराणान्तर्गतं श्रीगणाधीशस्तोत्रं समाप्तम् ।

Encoded by Karthik Chandan.P (kardan5380@yahoo.com)

and Amith K Nagaraj (amithkn@rediffmail.com)

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

Please send corrections to sanskrit@cheerful.com

Last updated ्today

http://sanskritdocuments.org

YogaShantiPradam Ganadhisha Stotram Lyrics in Devanagari PDF
% File name : yogashAntipradaMgaNAdhiishastotram.itx
% Location : doc_ganesha
% Author : Traditional
% Language : Sanskrit
% Subject : philosophy/hinduism/religion
% Transliterated by : Karthik Chandan.P : Amith K Nagaraj(amithkn at rediffmail.com)
% Proofread by : Proofread by Ravin Bhalekar ravibhalekar at hotmail.com
% Description-comments : mudgalapurANa
% Latest update : May 17, 2004
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [October 12, 2015] at Stotram Website